# AtmavidyAvilAsaH 2

# આત્મવિદ્યાવિલાસઃ ૨

## Document Information

Text title : Atma-Vidya-Vilasa 2

File name : AtmavidyAvilAsaH2.itx

Category : major_works, sadAshivabrahmendra

Location : doc_z_misc_major_works

Author : Sadashivendra Sarasvati

Proofread by : Sunder Hattangadi

Latest update : December 2, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# AtmavidyAvilAsaH 2

# આત્મવિદ્યાવિલાસઃ ૨

યત્પાદપદ્મમકરન્દજુષાં નરાણાં
    સંસારઘોરભુજગાન્ન ભવેત્સ્મ ભીતિઃ ।
સચ્ચિદ્ઘનં સકલસૌખ્યલવામ્બુરાશિં
    શ્રીદક્ષિણાભિમુખમૂર્તિમજં ભજેઽહમ્ ॥ ૧॥

એતાવદેવ ખલુ પુમ્ભિરવાપ્તુમર્હં
    યચ્ચેતસો નિલયનં નિજતત્ત્વબોધે ।
આક્રોશનં શ્રુતિશિરાંસિ યદર્થમેવ
    કુર્વન્તિ યેન હિ ભવેત્પુરુષઃ સુખાબ્ધિઃ ॥ ૨॥

માતેવ પુત્રમનુબોધયતિ શ્રુતિર્હિ
    લોકં સમસ્તમપિ યોજયિતું સુખેન ।
તસ્માચ્છ્રુતેરભિહિતાર્થમતન્દ્રિતેન
    ચિત્તેન સાધયિતુમત્ર જના યતધ્વમ્ ॥ ૩॥

આદાવિદં સકલમેવ જગત્સદાસી-
    ત્કુમ્ભાદિવત્તદનુ શક્તિયુતાત્પરસ્માત્ ।
આકાશવાયુદહનામ્બુભુવો બભૂવુ-
    ર્વાતપ્રસક્તસલિલાદિવ વીચિપૂરઃ ॥ ૪॥

સૂક્ષ્માખ્યભૂતગતસત્ત્વરજસ્તમોભિ-
    ર્લિઙ્ગં શરીરમુદભૂદત ઈશ્વરેચ્છા ।
પઞ્ચીચકાર વિયદાદિકભૂતસૂક્ષ્મા-
    ણ્યણ્ડં હ્યભૂદત ઇદં સહ જીવભોગ્યૈઃ ॥ ૫॥

સૃષ્ટ્વા જગત્સકલમેવમશેષકર્તા
    તત્પ્રાવિશત્પુનરુપાગતજીવભાવઃ ।
વિસ્મૃત્ય સત્યસુખબોધમયસ્વરૂપં
    ભ્રાન્ત્યા ભ્રમત્યનિશમસ્તવિવેકલેશઃ ॥ ૬॥

ઇત્થં પ્રમાદવશતઃ પરિમુહ્યમાનો
    દેહાત્મબુદ્ધિપરિકલ્પિતકર્મબન્ધઃ ।
સ્વર્ગાદિભોગગમનાગમનાતિખિન્નો
    લૂતાવદેષ ભવમભ્યગમચ્ચિદાત્મા ॥ ૭॥

માયાયુતસ્ત્વગમદીશ્વરતાં ચિદાત્મા
    ચાવિદ્યયા યુગભવદ્ભૃતજીવભાવ ॥

માયા ભવેદ્વિમલસત્ત્વગુણપ્રધાના
    પ્રોક્તા મલાપિહિતસત્ત્વગુણા ત્વવિદ્યા ॥ ૮॥

એકોઽપ્યનેક ઇવ ભાતિ શરીરભેદા-
    દાત્મા ઘટાદિગતભેદવશાદ્વિયદ્વત્ ।
દેહેન્દ્રિયાદિષુ ચલત્સુ નિજપ્રકાશા-
    ત્પૂર્ણોઽપિ નિશ્ચલતરોઽપિ વિકારવદ્વત્ ॥ ૯॥

એવં ભવાર્ણવનિમજ્જનદુઃખિતેષુ
    લોકેષુ પૂર્વજનિસઞ્ચિતપુણ્યપુઞ્જૈઃ ।
કશ્ચિદ્વિશુદ્ધમતિરેત્ય ગુરું કૃપાબ્ધિં
    પ્રાહ પ્રણમ્ય ભવસાગરલઙ્ઘનેચ્છુઃ ॥ ૧૦॥

સંસારઘોરજલધૌ ભગવન્નપારે
    તાપત્રયૌઘદહને સહજારિનક્રે ।
મોહામ્ભસિ પ્રચલદુદ્ભવમૃત્યુભઙ્ગે
    વીક્ષ્યાન્તરસ્મિ પતિતં જગદદ્ય ભીતઃ ॥ ૧૧॥

માતુઃ સ્થિતસ્ય જઠરે વચસાં ચ દૂરં
    દુઃખં પુનર્જનનકાલભવં દુરૂહ્યમ્ ।
બાલ્યેઽપિ દુઃખમવિષહ્યમવારણીય-
    માલોચ્ય ભીતિરધુના મહતી મમોત્થા ॥ ૧૨॥

તારુણ્યમેત્ય કુલયૌવનરૂપસમ્પ-
    દ્વિદ્યાત્મગર્વપિહિતાત્મહિતાભિલાષઃ ।
વિણ્મૂત્રમાંસરુધિરાસ્થિમયે શરીરે
    નાર્યા રુચિં સમુપયાતિ જનો વિચિત્રમ્ ॥ ૧૩॥

સર્વાપદાં નિલયમેત્ય વયોઽધિકત્વં
    જન્તુઃ સુખં ન લભતે હ્યપિ કિઞ્ચિદત્ર ।
પુંસામિહાસ્તિ ન ભયં ખલુ મૃત્યુતોઽન્ય-
    દ્ધિક્કૃત્ય સંસૃતિમિમામભવં વિરક્તઃ ॥ ૧૪॥

સ્વામિન્કથં મમ ભવાર્ણવલઙ્ઘનં સ્યા-
    દાયાસલેશરહિતં વદ તત્ર હેતુમ્ ।
શ્રુત્વા તુ શિષ્યવચનં રમણીયમિત્થં
    પ્રત્યુત્તરં ગુરુરદાત્કૃતમન્દહાસઃ ॥ ૧૫॥

દેહેન્દ્રિયાસુહૃદયાદિકચૈત્યવર્ગા-
    ત્પ્રત્યક્ચિતેર્વિભજનં ભવવારિરાશેઃ ।
સન્તારણે પ્લવ ઇતિ શ્રુતિડિણ્ડિમોઽયં
    તસ્માદ્વિચારય જડાજડયોઃ સ્વરૂપમ્ ॥ ૧૬॥

પ્રત્યક્ચિતિર્વપુરિદં ન ભવેજ્જડત્વા-
    ત્કુડ્યાદિવજ્જડતયાપ્યસવો ન ચિત્સ્યુઃ ।
નાપીન્દ્રિયાણિ કરણં કુત એવ ચિત્સ્યા-
    ત્કુદ્દાલકાદિવદિતિ પ્રવિચારય ત્વમ્ ॥ ૧૭॥

દૃશ્યત્વતો ન મનસશ્ચ ભવેચ્ચિતિત્વં
    નાહઙ્કૃતિશ્ચ પરિણામવતી ચિતિઃ સ્યાત્ ।
બુદ્ધેરચિત્ત્વમપિ જન્મવિનાશવત્ત્વા-
    ચ્ચિત્તં ચ દૃશ્યમચિદિત્યનુચિન્તય ત્વમ્ ॥ ૧૮॥

બુદ્ધ્વા સમસ્તમપિ દૃશ્યમચિત્સ્વરૂપં
    પ્રત્યક્ચિતિં ચ નિજરૂપતયા વિદિત્વા ।
દેહેન્દ્રિયાદ્યખિલસાક્ષ્યહમિત્યજસ્રં
    સઞ્ચિન્તય વ્યપગતાખિલસંશયઃ સન્ ॥ ૧૯॥

દેહાદિકં જગદસજ્જડદુઃખરૂપં
    મય્યદ્વિતીયનિજબોધસદાદિરૂપે ।
સન્દૃશ્યતે ભ્રમવશાદ્ગગને નિરંશે
    ગન્ધર્વપત્તનમિવેત્યનુભાવય ત્વમ્ ॥ ૨૦॥

યા ચિત્પ્રભા ત્વમિતિ મેયવિભાસયિત્રી
    યત્સઙ્ક્રમાદ્ઘટપટાદ્યવભાસિકા ધીઃ ।

આબ્રહ્મકીટમહમિત્યવભાસમાના
    યા સૈવ સંવિદિતિ ચિન્તય સન્તતં ત્વમ્ ॥ ૨૧॥

જાગ્રન્મુખત્રિવિધધામસુસાક્ષિણી યા
    જાગ્રન્મુખત્રિવિધધામ વિલક્ષણાયા ।
સ્વપ્નાદ્યનુસ્મૃતિબલાત્સતતૈકરૂપા
    સૈવાહમસ્મિ ચિતિરિત્યવધારય ત્વમ્ ॥ ૨૨॥

નોદેતિ નાસ્તમુપયાતિ ન વૃદ્ધિમેતિ
    નૈવોપયાતિ પરિણામમપક્ષયં વા ।
સ્વાધ્યસ્તસર્વજનનાદિવિકારસાક્ષિ-
    ણ્યેષા હિ સંવિદિતિ ચિન્તય સન્તતં ત્વમ્ ॥ ૨૩॥

મચ્છેષતાં સમવલમ્બ્ય સુતાદિસર્વં
    યેન પ્રિયં ભવતિ તેન સુખસ્વરૂપઃ ।
દેહેન્દ્રિયાદિવિષયપ્રલયૈકસાક્ષી
    યસ્માત્તતઃ સદિતિ મે નિજરૂપમાસ્સ્વ ॥ ૨૪॥

આદૌ ત્વમેવ સદભૂરવિશેષરૂપ-
    સ્ત્વત્તોદિતં જગદિદં સવિશેષજાતમ્ ।
ત્વય્યેવ તિષ્ઠતિ તથા ત્વયિ ચાવસાને
    સંલીયતે જલનિધાવિવ બુદ્બુદાદિઃ ॥ ૨૫॥

વ્યાપિત્વહેતુબલતો ન દિશાસ્તિ મેઽન્તો
    નિત્યત્વહેતુબલતશ્ચ ન કાલતોઽન્તઃ ।
સાર્વાત્મ્યહેતુબલતશ્ચ ન વસ્તુતોઽન્ત-
    સ્તસ્માદનન્તમિતિ મે નિજરૂપમાસ્સ્વ ॥ ૨૬॥

એવં નિરન્તરસમાધિવશાન્નિરાધિ-
    ર્જ્ઞાનાગ્નિદગ્ધસહકારણજન્મબીજઃ ।
આવિર્ભવન્નિજસુખાનુભવૈકતૃપ્તો
    બ્રહ્મૈવ નૂનમિહ સમ્ભવસિ ધ્રુવં ત્વમ્ ॥ ૨૭॥

ઇત્થં ગિરા વિમલયા પરસૌખ્યદાત્ર્યા
    વાચા ગુરોર્વિમથિતાખિલસંશયૌઘઃ ।
શિષ્યઃ સમાધિપરિશીલનતીક્ષ્ણદિવ્ય-
    જ્ઞાનાસિખણ્ડિતભવાખ્યવિષદ્રુમોઽભૂત્ ॥ ૨૮॥

સ્વાનન્દમપ્રતિહતં પરિભુજ્ય હર્ષા-
    દશ્રુપ્રપૂર્ણનયનઃ પુલકાઙ્ગિતાઙ્ગઃ ।
શિષ્યઃ સગદ્ગદમુવાચ ગુરું ઘૃણાબ્ધિં
    નત્વા તદઙ્ઘ્રિયુગલં વિનયોપયુક્તઃ ॥ ૨૯॥

સ્વામિન્ભવદ્વચનદિવ્યસુધાભિષિક્ત-
    સ્વાનન્દમઞ્જુનગરે વિહરામિ નિત્યે ।
અજ્ઞાનદુર્હૃદમતીવ શિતેન સમ્ય-
    ગ્જ્ઞાનાસિના પરિવિલૂય સહાનુજાતમ્ ॥ ૩૦॥

ગચ્છામિ કુત્ર કિમહં કરવાણિ કિં વા
    ગૃહ્ણામિ કિં પરિજહામિ મયિ પ્રપૂર્ણે ।
નિર્વ્યાજસૌખ્યજલધૌ પરિદૃશ્યમાનં
    ફેનાદિકં જગદિતિ સ્થિરનિશ્ચયો મે ॥ ૩૧॥

માયાભિધો જલધરો જગદાખ્યમમ્બુ
    વર્ષત્વનેન મમ ચિદ્વપુષઃ ક્ષતિઃ કા ।
લાભોઽપિ વા ક ઇતિ સન્તતમાત્મરૂપં
    સઞ્ચિન્તયન્સ્થિરમતિર્વિહરામિ નિત્યે ॥ ૩૨॥

વાક્કાયમાનસભવં સકલં હિ કર્મ
    પ્રોક્તં શુભાશુભમયં ન તતોઽસ્તિ ભિન્નમ્ ।
વાગાદિસાક્ષિણિ કથં મયિ નિર્મલે સ્યા-
    ત્કર્મદ્વયં તદુદિતં જનનાદિકં વા ॥ ૩૩॥

વ્યાવૃત્તરૂપમિદમેવ જગદ્વિભિન્નં
    જ્ઞાનં ત્વભિન્નમનુવૃત્તતયાખિલેષુ ।
જ્ઞાનં ચ ભિન્નમિતિ ચેજ્જડતાદિદોષ-
    પ્રાપ્તિર્ભવેચ્છ્રુતિશિરાંસિ ન તં સહન્તે ॥ ૩૪॥

નૈવેન્દ્રિયાણિ વિષયેષુ નિયોજયામિ
    પ્રાગ્વાસનાવશત એવ હિ તાનિ યાન્તિ ।
સ્વાન્ગોચરાન્પ્રતિ મમાસ્તિ ન સાક્ષિતાપિ
    સા સાક્ષ્યભેદકલિતા ખલુ સોઽપ્યસત્યઃ ॥ ૩૫॥

ભેદોઽપિ સાક્ષ્યગત એવ ન સાક્ષિણો મે

ભેદસ્ય સાક્ષિણિ કથં પ્રભવેત્સ ભેદઃ ।
ભેદો ન સુપ્તિસમયેઽનુપલમ્ભનાચ્ચ
સન્નાસ્તિતા ન ઇહ દૃષ્ટતયા ન વાચ્યા ॥ ૩૬॥

વિશ્વં સદેતદિતિ કાર્યકરત્વહેતો-
ર્યદ્યસ્ય સત્ત્વમિહ સાધયિતું યતેથાઃ ।
તર્હ્યત્ર રજ્જુભુજગાદ્યપિ સદ્બલાત્સ્યા-
ત્સત્યત્વહેતુરિદમાહુરબાધિતત્વમ્ ॥ ૩૭॥

કીદૃગ્વિધં જગદયે વદ સત્ત્વચિત્ત્યા-
દ્યાકારહીનમિતિ પૃષ્ટવતેઽસ્તિ મહ્યમ્ ।
પ્રત્યુત્તરં કિમિતિ તે તવ મૌનમેવ
પ્રત્યુત્તરં ભવતિ માં પ્રતિ ગચ્છ જાલ્મ ॥ ૩૮॥

જ્ઞાનાગ્નિદગ્ધમપિ ભાતિ જગદ્વિચિત્રં
યચ્ચ ધ્વનિભ્રમવતઃ સવિશેષબોધાત્ ।
તસ્મિન્ભ્રમે વિમથિતેઽપિ તથૈવ ભાતિ
દિગ્વત્યથો મમ ચ તદ્વદતો ન સત્તત્ ॥ ૩૯॥

ભૂમિં જલે તદપિ તેજસિ તચ્ચ વાયૌ
તં વ્યોમ્નિ તત્ત્રિગુણયા સહ મય્યનન્તે ।
પૂર્ણે વિલાપ્ય પરિશિષ્ટમખણ્ડસંવિ-
ત્સ્વાનન્દરૂપમનુભૂય રમેઽહમદ્ય ॥ ૪૦॥

અજ્ઞાનતન્નિરસને મયિ બોધરૂપે
સ્યાતાં કથં તિમિરતદ્વિરતી ઇવાર્કે ।
બન્ધશ્ચ મોક્ષ ઇતિ કલ્પનમપ્યસત્યં
ભ્રાન્ત્યૈવ ભાત્યખિલસાક્ષિણિ નિત્યમુક્તે ॥ ૪૧॥

આરબ્ધકર્મણિ ચ ભોગત એવ નષ્ટે
પ્રાણાદયોઽપિ મમ નોત્ક્રમિતું સમર્થાઃ ।
તસ્માગ્નિનિષ્ઠજતુવન્મયિ પૂર્ણબોધે
લીના ભવન્તિ ન પુનર્જનનાદિકં સ્યાત્ ॥ ૪૨॥

આમ્નાયમસ્તકસુસંસ્કૃતવૈભવોઽહં
વ્યોમ્નોઽપિ પૂર્ણતમમૂર્તિરહં સ્થિતોઽહમ્ ।
સર્વાલયોઽહમહમાદ્યવભાસકોઽહં

વાગાદ્યગોચરસદોદિતસૌખ્યકોઽહમ્ ॥ ૪૩॥

ઇતિ શ્રીસદાશિવેન્દ્રસરસ્વત્યા વિરચિતઃ આત્મવિદ્યાવિલાસઃ (૨) સમ્પૂર્ણઃ ॥

Proofread by Sunder Hattangadi

---

*AtmavidyAvilAsaH 2*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*